# ब्रह्मविदाशीर्वादपद्धतिसंक्षेपः

brahmavid-āśīrvāda-paddhati-saṃkṣepaḥ

*Prayers of the knowers of Brahman*

वेदवेदान्तसाम्राज्यधर्मकामार्थमोक्षदम्।

विद्यारण्यन्नुमः पुण्यं योऽविद्यारण्यमच्छिनत्॥

vedavedāntasāmrājyadharmakāmārthamokṣadam ।
vidyāraṇyannumaḥ puṇyaṁ yo'vidyāraṇyamacchinat ।।

*We salute to Śrī Vidyāraṇya Swamiji, holy personage,*
*the bestower of sovereignty [mastery] of Veda [the first part]*
*and Vedānta [the last part] and all human goals*
*and who destroys the forest of ignorance.*

## बुद्धियोगप्रार्थना [buddhiyogaprārthanā]

१ (मूलक्रमाङ्कः ३२) परमेश्वरं प्रीतिपूर्वकं भजन्तो भक्ता येनानन्यबुद्धियोगेन सम्यग्दर्शनलक्षणेन भगवन्तं परमेश्वरमात्मत्वेन उपयान्ति प्रतिपद्यन्ते, तं बुद्धियोगं भगवान् वासुदेवो मे ददातु इति आशीर्निरन्तरं भूयात् । [ध्रुवपङ्क्तिः] - इति भवन्तो महान्तोऽनुगृह्णन्तु । तथास्तु ।

**1** (*mūlakramāṅkaḥ* 32) parameśvaraṃ prītipūrvakaṃ bhajanto bhaktā yenānanyabuddhiyogena samyagdarśanalakṣaṇena bhagavantaṃ parameśvaram ātmatvena upayānti pratipadyante, taṃ buddhiyogaṃ bhagavān vāsudevo me dadātu iti āśīrnirantaraṃ bhūyāt ।

[dhruvapaṅktiḥ] – iti bhavanto mahānto'nugṛhṇantu । tathāstu ।

## ज्ञानयोगस्वरूपम् [jñānayogasvarūpam]

२ (१४) शमादिपूर्वकश्रवणमनननिदिध्यासनाभ्यासरूपतत्त्वज्ञानाभ्यासबलात्, विषयासक्तिः, प्रज्ञामान्द्यं, विपर्ययः, दुराग्रहश्चेति वर्तमानप्रतिबन्धचतुष्टयनिवृत्तिद्वाराअप्रतिबद्धापरोक्षब्रह्मसाक्षात्कारो दृढीभूयात् ।

**2** (14) śamādipūrvakaśravaṇamanananididhyāsanābhyāsarūpa-tattvajñānābhyāsabalāt, viṣayāsaktiḥ, prajñāmāndyaṃ, viparyayaḥ, durāgrahaśceti vartamānapratibandhacatuṣṭayanivṛttidvārā apratibaddhāparokṣabrahmasākṣātkāro dṛḍhībhūyāt ।

## श्रवणनिरूपणम् [śravaṇanirūpaṇam]

३ (१५) उपक्रमादिषड्विधलिङ्गैः अशेषवेदान्तानाम् अद्वैते ब्रह्मणि तात्पर्यावधारणं दृढीभूयात् ।

**3** (15) upakramādiṣaḍvidhaliṅgaiḥ aśeṣavedāntānām advaite brahmaṇi tātparyāvadhāraṇaṃ dṛḍhībhūyāt ।

## त्वंपदार्थनिरूपणम् [tvaṃpadārthanirūpaṇam]

४ (४) अहमादिदृश्यविलक्षणास्मत्प्रत्ययालम्बनभूतप्रत्यक्चिन्मात्रस्वरूपज्ञानसिद्धिर्भूयात् ।

**4** (4) ahamādidṛśyavilakṣaṇāsmatpratyayālambanabhūta-pratyakcinmātrasvarūpajñānasiddhirbhūyāt ।

५ (३७) असज्जडदु:खात्मकाहङ्कारादिभ्यो विलक्षणतया, प्रातिकूल्येन सत्यज्ञानानन्दरूपेण अञ्चति प्रकाशत इति, प्रत्यगात्मज्ञानसिद्धि: सम्यग्भूयात् ।

**5** (37) asajjaḍaduḥkhātmakāhaṅkārādibhyo vilakṣaṇatayā, prātikūlyena satyajñānānandarūpeṇa añcati prakāśata iti, pratyagātmajñānasiddhiḥ samyagbhūyāt ।

६ (३४) देहेन्द्रियादिसकलजडावभासकत्वेन आत्मा चिद्रूप इति चिदात्मज्ञानसिद्धि: सम्यग्भूयात् ।

**6** (34) dehendriyādisakalajaḍāvabhāsakatvena ātmā cidrūpa iti cidātmajñānasiddhiḥ samyagbhūyāt ।

७ (५२) साधनान्तरनिरपेक्षतया स्वयमेव भासमानत्वात्, आत्मा स्वयंप्रकाश इति स्वयंप्रकाशज्ञानं सम्यग्भूयात् ।

**7** (52) sādhanāntaranirapekṣatayā svayam eva bhāsamānatvāt, ātmā svayaṃprakāśa iti svayaṃprakāśajñānaṃ samyagbhūyāt ।

८ (३५) आत्मनि कदाचिदप्यप्रियत्वाभावेन, परमप्रेमास्पदत्वेन च, आत्मा परमानन्दरूप इति, आनन्दात्मज्ञानसिद्धि: सम्यग्भूयात् ।

**8** (35) ātmani kadācidapyapriyatvābhāvena, paramapremāspadatvena ca, ātmā paramānandarūpa iti, ānandātmajñānasiddhiḥ samyagbhūyāt।

९ (४२) आत्मसहितत्वेन, दुःखात्मकस्य देहादेरपि प्रियत्वादात्मा परमानन्दरूप इति आनन्दात्मज्ञानसिद्धिः सम्यग्भूयात् ।

**9** (42) ātmasahitatvena, duḥkhātmakasya dehāderapi priyatvādātmā paramānandarūpa iti ānandātmajñānasiddhiḥ samyagbhūyāt ।

१० (४९) यत्र यद्वस्तु अस्तीति ईक्षते तेन वस्तुना अन्यत्र अनन्वागतत्वेन आत्मा असङ्ग इति असङ्गात्मज्ञानं सम्यग्भूयात् ।

**10** (49) yatra yadvastu astīti īkṣate tena vastunā anyatra ananvāgatatvena ātmā asaṅga iti, asaṅgātmajñānaṃ samyagbhūyāt ।

११ (१) हिरण्यगर्भादिस्थावरान्तेषु शरीरेषु यदेकं चैतन्यमस्ति तदेवाहमस्मीति दृढज्ञानं निरन्तरं भूयात् ।

**11** (1) hiraṇyagarbhādisthāvarānteṣu śarīreṣu yadekaṃ caitanyam asti tad evāham asmīti dṛḍhajñānaṃ nirantaraṃ bhūyāt ।

## तत्पदार्थनिरूपणम् [tatpadārthanirūpaṇam]

१२ यतो वा इत्यादिश्रुत्या जगत्कारणत्वेन प्रतिपादितस्य सर्वज्ञसर्वशक्तिसर्वव्यापकस्य सर्वेश्वर इत्यादिरूपेण लोकशास्त्रप्रसिद्धस्य तत्पदवाच्यब्रह्मणो ज्ञानं सम्यग्भूयात् ।

**12** yato vā ityādiśrutyā jagatkāraṇatvena pratipāditasya sarvajñasarvaśaktisarvavyāpakasya sarveśvara ityādirūpeṇa lokaśāstraprasiddhasya tatpadavācyabrahmaṇo jñānaṃ samyagbhūyāt ।

१३  सत्यं ज्ञानमनन्तं ब्रह्मेत्यादिश्रुत्या नित्यनिर्विकारासङ्गाद्वितीयपरिपूर्णसच्चिदानन्दत्वेन लक्षितस्य तत्पदलक्ष्यार्थनिरुपाधिकब्रह्मणो ज्ञानं सम्यग्भूयात् ।

**13**  satyaṃ jñānam anantaṃ brahmetyādiśrutyā nityanirvikārāsaṅgādvitīyaparipūrṇasaccidānandatvena lakṣitasya tatpadalakṣyārthanirupādhikabrahmaṇo jñānaṃ samyagbhūyāt ।

## ऐक्यनिरूपणम् [aikyanirūpaṇam]

१४ (१०) यो ब्रह्मादिस्तम्बपर्यन्तानां सर्वेषां प्राणिनां देहमध्ये, तत्तद्देहसाक्षित्वेन भासमानः, परिपूर्णात्माऽस्ति, सोऽयं परमात्मा, केवलं मुमुक्षोः पुरुषस्य मे स्वरूपमित्येवंरूपं ब्रह्मात्मैक्यज्ञानं दृढीभूयात् ।

**14** (10) yo brahmādistambaparyantānāṃ sarveṣāṃ prāṇināṃ dehamadhye, tattaddehasākṣitvena bhāsamānaḥ , paripūrṇātmā'sti, so'yaṃ paramātmā, kevalaṃ mumukṣoḥ  puruṣasya me svarūpamityevaṃrūpaṃ brahmātmaikyajñānaṃ dṛḍhībhūyāt ।

## मनननिरूपणम् [manananirūpaṇam]

१५ (१६) श्रीगुरुमुखात् श्रुताद्वितीयवस्तुनः वेदान्तानुगुणयुक्तिभिः अनवरतमनुचिन्तनं भूयात् ।

**15** (16) śrīgurumukhāt śrutādvitīyavastunaḥ  vedāntānuguṇayuktibhiḥ anavaratamanucintanaṃ bhūyāt ।

१६ (३६) अभारूपस्य विश्वस्य भानं, भासकसन्निधिं विना कदाचिदपि न संभवतीति भारूपात्मा सर्वगत इति सर्वगतात्मनिश्चयः सम्यग्भूयात् ।

**16** (36) abhārūpasya viśvasya bhānaṃ, bhāsakasannidhiṃ vinā kadācidapi na saṃbhavatīti bhārūpātmā sarvagata iti sarvagatātmaniścayaḥ samyagbhūyāt ।

१७ (२७) स्वप्नः स्वातिरेकेण यथा नास्ति, तथैव स्वजाग्रदपि स्वातिरेकेण नास्ति, तेन अद्वितीयात्मनिश्चयः सम्यग्भूयात् ।

**17** (27) svapnaḥ svātirekeṇa yathā nāsti, tathaiva svajāgradapi svātirekeṇa nāsti, tena advitīyātmaniścayaḥ samyagbhūyāt ।

## निदिध्यासननिरूपणम् [nididhyāsananirūpaṇam]

१८ (१७) विजातीयदेहादिप्रत्ययानन्तरितसजातीयसच्चिदानन्दात्मप्रत्ययप्रवाहो निरन्तरं भूयात् ।

**18** (17) vijātīyadehādipratyayānantarita-sajātīyasaccidānandātma-pratyaya-pravāho nirantaraṃ bhūyāt ।

## समाधिनिरूपणम् [samādhinirūpaṇam]

१९ (१९) अहमात्मा साक्षी, केवलः, चिन्मात्रस्वरूपः; नाज्ञानं नापि तत्कार्यं; किन्तु, नित्यशुद्धबुद्धमुक्तसत्यपरमानन्दाद्वयब्रह्मैव अहमस्मीति अभेदेनावस्थानं समाधिः भूयात् ।

**19** (19) aham ātmā sākṣī, kevalaḥ, cinmātrasvarūpaḥ ; nājñānaṃ nāpi tatkāryaṃ ; kintu, nityaśuddhabuddhamuktasatyaparamānandādvaya-brahmaiva aham asmīti abhedenāvasthānaṃ samādhiḥ bhūyāt ।

२० (२) निर्विकल्पसमाधिप्रतिबन्धक-लयविक्षेपकषायरसास्वादेभ्यो रक्षितं मे चित्तमविघ्नेन ब्रह्मण्यवस्थितं भूयात् ।

**20** (2) nirvikalpasamādhipratibandhaka-layavikṣepakaṣāyarasāsvādebhyo rakṣitaṃ me cittam avighnena brahmaṇyavasthitaṃ bhūyāt ।

२१ (९) असंभावनाविपरीतभावनारहितत्वेन करतलामलकवद् अहं ब्रह्मास्मीति अप्रतिबद्धापरोक्षब्रह्मसाक्षात्कारो दृढीभूयात् ।

**21** (9) asaṃbhāvanāviparītabhāvanārahitatvena karatalāmalakavad ahaṃ brahmāsmīti apratibaddhāparokṣabrahmasākṣātkāro dṛḍhībhūyāt ।

२२ (११) वासनाक्षयमनोनाशतत्त्वज्ञानाभ्यासवशाद् ज्ञानरक्षा, तपःसिद्धिः, सर्वसमत्वं, दुःखनिवृत्तिः, सुखाविर्भावः इत्येतत् पञ्चप्रयोजनसिद्धिर्भूयात् ।

**22** (11) vāsanākṣayamanonāśatattvajñānābhyāsavaśād jñānarakṣā, tapaḥsiddhiḥ , sarvasamatvaṃ, duḥkhanivṛttiḥ, sukhāvirbhāvaḥ ityetat pañcaprayojanasiddhirbhūyāt ।

२३ (४४) पूर्वापरपरामर्शमन्तरेण सहसोत्पद्यमानस्य क्रोधादिवृत्तिविशेषस्य हेतोश्चित्तसंस्कारस्य, विवेकजन्यायां क्षान्त्यादिवासनायां दृढायां सत्यां विनाशात्, क्रोधाद्यनुत्पत्तिः सम्यग्भूयात् ।

**23** (44) pūrvāparaparāmarśamantareṇa sahasotpadyamānasya krodhādivṛttiviśeṣasya hetościttasaṃskārasya, vivekajanyāyāṃ kṣāntyādivāsanāyāṃ dṛḍhāyāṃ satyāṃ vināśāt, krodhādyanutpattiḥ samyagbhūyāt ।

२४ (१२) मैत्रीकरुणामुदितोपेक्षारूपसद्वासनापाटवेन रागादिदुर्वासनाक्षयः सम्यग्भूयात् ।

**24** (12) maitrīkaruṇāmuditopekṣārūpasadvāsanāpāṭavena rāgādidurvāsanākṣayaḥ samyagbhūyāt ।

ज्ञानफलनिरूपणम् [jñānaphalanirūpaṇam]

२५ (२०) परावरब्रह्मसाक्षात्कारेण अस्य परावरब्रह्मसाक्षात्कृतवतो मम हृदयग्रन्थिभेदसर्वसंशयनिवृत्तिसर्वकर्मक्षयरूपपरमपुरुषार्थः सम्यगाविर्भूयात् ।

**25** (20) parāvarabrahmasākṣātkāreṇa asya parāvarabrahmasākṣātkṛtavato mama hṛdayagranthibhedasarvasaṃśayanivṛttisarvakarmakṣayarūpaparamapuruṣārthaḥ samyagāvirbhūyāt ।

२६ (२१) अहंकारात्मनोः एकत्वभ्रमनिवृत्तिरूपोऽयं हृदयग्रन्थिभेदो दृढीभूयात् ।

**26** (21) ahaṃkārātmanoḥ ekatvabhramanivṛttirūpo'yaṃ hṛdayagranthibhedo dṛḍhībhūyāt ।

२७ (२२) आत्मा देहादिव्यतिरिक्तो वा न वा, व्यतिरिक्तत्वेऽपि कर्तृत्वादिधर्मयोगी वा न वा, अकर्तृत्वेऽपि, तस्य ब्रह्मणा अभेदोऽस्ति वा न वा, अभेदेऽपि तज्ज्ञानं कर्मादिसहितं वा मुक्तिसाधनं केवलं वा, आत्मनो ब्रह्मत्वे सत्यपि तद्बुद्ध्या वेदितुं शक्यते वा न वा, मम परमार्थतो ब्रह्मत्वे सत्यपि तादृग्रूपं साक्षात्कृतं वा न वा, साक्षात्कृतेऽपि इतः परं कर्तव्यमस्ति वा न वा, कर्तव्याभावेऽपि, इदानीं मम जीवन्मुक्तिरस्ति वा न वा, जीवन्मुक्तत्वेऽपि, वर्तमानदेहपातानन्तरं विदेहमुक्तिर्भविष्यति वा न वा, तत्प्राप्तावपि, कालान्तरे पुनर्जन्म भविष्यति वा न वा, इत्यादिसर्वसंशयनिवृत्तिर्भूयात् ।

**27** (22) ātmā dehādivyatirikto vā na vā, vyatiriktatve'pi kartṛtvādidharmayogī vā na vā, akartṛtve'pi, tasya brahmaṇā abhedo'sti vā na vā, abhede'pi tajjñānaṃ karmādisahitaṃ vā muktisādhanaṃ kevalaṃ vā, ātmano brahmatve satyapi tadbuddhyā vedituṃ śakyate vā na vā, mama paramārthato brahmatve satyapi tādṛgrūpaṃ sākṣātkṛtaṃ vā na vā, sākṣātkṛte'pi itaḥ paraṃ kartavyam asti vā na vā, kartavyābhāve'pi, idānīṃ mama jīvanmuktirasti vā na vā,

jīvanmuktatve'pi, vartamānadehapātānantaraṃ videhamuktirbhaviṣyati vā na vā, tatprāptāvapi, kālāntare punarjanma bhaviṣyati vā na vā, ityādisarvasaṃśayanivṛttirbhūyāt ।

२८ (२३) अनारब्धानामागामिजन्महेतूनामनेककोटिजन्मार्जितानां प्रारब्धव्यतिरिक्तानां सञ्चितकर्मणां निवृत्तिरूपः परमपुरुषार्थः सम्यगाविर्भूयात् ।

**28** (23) anārabdhānām āgāmijanmahetūnām anekakoṭijanmārjitānāṃ prārabdhavyatiriktānāṃ sañcitakarmaṇāṃ nivṛttirūpaḥ paramapuruṣārthaḥ samyagāvirbhūyāt ।

२९ (३५) ज्ञानोत्पत्त्यनन्तरं जीवन्मुक्त्यवस्थायां बाधिताहंकारानुवृत्त्या शरीरेन्द्रियादिभिरनुष्ठितकर्मजन्यानां पुण्यपापानाम् आगामिकर्माख्यानाम् असंश्लेषरूपप्रयोजनसिद्धिः सम्यग्भूयात् ।

**29** (35) jñānotpattyanantaraṃ jīvanmuktyavasthāyāṃ bādhitāhaṃkārānuvṛttyā śarīrendriyādibhiranuṣṭhitakarmajanyānāṃ puṇyapāpānām āgāmikarmākhyānām asaṃśleṣarūpaprayojanasiddhiḥ samyagbhūyāt ।

३० (४५) यस्य प्रसादाद् "अहमेव विष्णुः, मय्येव सर्वं परिकल्पितं च" इति, आत्मस्वरूपं विजानामि, तस्य पादारविन्दयोः अचञ्चला भक्तिर्भूयात् ।

**30** (45) yasya prasādād "ahameva viṣṇuḥ , mayyeva sarvaṃ parikalpitaṃ ca" iti, ātmasvarūpaṃ vijānāmi, tasya pādāravindayoḥ acañcalā bhaktirbhūyāt ।

ओं तत् सत्

oṁ tat sat